Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 5 | ISSN : 2581- 6306

# ग्रामीणविद्यालयेषु महिलाध्यापिकानां पर्यावरणीयचेतनायाः समीक्षा

डॉ. आर् एल् नारायणसिंहः
सहाचार्यः,शिक्षाशास्त्रविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालम्
प्रतिभा
शोधच्छात्रा, शिक्षाशास्त्रविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालम्

**Article Info**
Volume 5, Issue 5
Page Number : 39-42

**Publication Issue :**
September-October-2022

**Article History**
Accepted : 01 Sep 2022
Published : 20 Sep 2022

**शोधसारांशः** - प्रकृत्या सह मानवजीवनस्य सम्बन्धः सृष्टेः सभ्यतायाश्च आरम्भकालादेव वर्तते । मानवानां सभ्यताः संस्कृतयः च प्रकृतेः संरक्षणे एव पुष्पिताः पल्लविताः फलिताश्चाभवन् । प्रकृतिः मनुष्याणां पोषणसंवर्धनमकरोत् । मानवेन प्रकृतेः संरक्षणं सम्मानञ्च कृतम् । मानवस्य पर्यावरणस्य च घनिष्ठः सम्बन्धः वर्तते । द्वयोः एकस्यैव ईश्वरस्य कृती वर्त्तेते । एतावेव अस्याः सामाजिकसंरचनायाः स्तम्भौ वर्तेते। अनयोः यदि एकोऽपि स्तम्भः स्खलेत् चेदन्यः सामाजिकसंरचनायाः भारं वोढुम् अशक्तो भवेत् सामाजिकव्यवस्था च सर्वथा भिद्येत् तस्याः संरचनायाः ध्वंसनं च स्यात् । अत्र नार्येव राष्ट्रस्याधारशक्तिरूपेण राजते । **महात्मागान्धिमहोदयेनापि** स्वकीये महिलापुरुषसाम्यसिद्धान्ते कथितं यत् **"महिलाः कथमपि पुरुषाणामपेक्षया शक्तिहीनाः न"** इति । महाराजेन मनुनापि मनुस्मृति इति नामके ग्रन्थे नार्याः महत्तायाः विवेचनं कुर्वता स्पष्टीकृतं यत् - **"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।यत्रैतास्तु न पूज्यन्ते तत्र सर्वाफलाः क्रियाः॥**[1] अर्थात् यत्र नार्याः पूजा (सम्मानं) भवति तत्र देवता अपि निवसन्ति । यत्र एतासां पूजा (सत्कारं) न भवति तत्र सर्वाणि अपि कर्माणि असफलानि भवन्ति । इत्युक्ते कियन्त्यपि धर्मानुष्ठानानि कुर्मः परन्तु सर्वाण्यपि असफलानि भवन्ति । तेषां कर्मणां फलं न प्राप्यते।

**मुख्यपदानि** : - विद्यालयः, पर्यावरणम् , शिक्षा, अध्यापिका, विद्यार्थी ।

अतः महिलाः पम्परायाः संस्कृतेः सभ्यतायाः तथा जीवनमूल्यानामतिजीवन्ताः वाहिकाः वर्तन्ते । ।यतोहि नित्यं शाश्वतमेवैतत् यत् नारीं विना समाजस्य कल्पनापि कर्तुं न शक्यते तथैव वृक्षां विना अथवा पर्यावरणं विना मानवजीवनं न सम्भवति । मानवजीवनस्य एकोऽपि पक्षः पर्यावरणेन विना सम्भाव्यमेव नास्ति । आदिकालादेव प्रकृतिपुरुषयोरन्योन्याश्रयत्वं वर्तते एव । नित्यक्रिया-संस्कार-व्रत-अनुष्ठान-पर्व- पूजापद्धति-नृत्यगीतादिषु सर्वेष्वपि पर्यावरणस्य समसनं दृष्टिगोचरी भवति । भारतीयलोकजीवने न केवलं पृथिव्यप्तेजाकाशाग्निसोमसूर्येत्यादय एव पूज्याः स्वीका अपितु परम्पराप्राप्तेषु नदी -गिरि- जलाशय-पशु-पक्षि- जीव-जन्तु- वृक्ष- वनस्पतिषु च सर्वेष्वपि

[1] - मुस्मृतिः 3.56

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

भाररतीयग्रन्थेषु प्राप्यते । यथा अस्माकं भारतीयदर्शने कथितं यत् "एकस्य वृक्षस्य माहात्म्यं मनुष्यस्य दशपुत्राणां साम्यं भजते । भणितमपि च –

**'दशकूपसमा वापी दशवापी समोह्रदः ।**

**दशह्रदसमः पुत्रो दशपुत्र समो द्रुमः ॥**[2]

पर्यावरणमित्युक्ते किमिति प्रकृतिपुरुषविशेषस्य कृते स्पष्टयता भगवता श्रीकृष्णेनैव साक्षादुक्तं **श्रीमद्भगवद्गीयतायाम्-** "ईश्वर एव प्रकृतेरुत्पत्पादकः पालकः विनाशकश्च वर्तते । एत्सर्वस्यापि मूलकर्त्ता स्वयमीश्वर एव वर्तते । इत्युक्ते प्रकृतिपुरुषविशेषौ न विभिन्नौ तादात्म्यसम्बन्धेन एकरूपमेव संदृश्येते । भगवदुक्ति विद्यते यत् **"अश्वत्थः सर्ववृक्षाणाम्** [3] इति । भगवद्गीतायां मानवानां प्रमुखकर्तव्येषु पर्यावरणस्य प्रकृतेश्च संरक्षणं करणीयम् इति शिक्ष्यते ।

भारते मुख्यतः ग्रामीणक्षेत्रेषु काष्ठैः गोमयेन च भोजननिर्माणकारणेन धूमः जायते तेनापि धूमेन वायुप्रदूषणस्य समस्या गृहेषु तथा बहिरपि आधिक्येन द्रष्टुं शक्नुमः। वाहनेभ्यः निःसरितेन धूमेन औद्योगकैः यन्त्रागारैः निःसरितधूमेन च वायुः प्रदुष्यति तथैतेनैव कारणेन मानवस्य हृदयव्यादधिः श्वाससम्बद्धव्याधयः प्रवर्धमानाः साम्प्रतं दृश्यन्ते । एतेन श्वासद्वारि– फुफ्फुसि दूषणमधिकं भवति अतः हृदयवेगावरोधेन मानवस्य मृत्युः बहुशो जायते । मुम्बईनगरे संशोधनेनैकेन ज्ञातं यत् पर्यावरणप्रदूषणकारणेन त्रिवर्षन्यूनवयसः बालकस्य रुधिरे सीसस्य मात्रा अत्यधिका प्राप्यमानास्ति एतत् बालकानां स्वास्थ्यं प्रभावयति । अस्मात् रक्षायै नगरेषु यातायतस्य साधनेषु न्यूनतां कृत्वा स्थानीयमानवान् च पर्यावरणं प्रति जागरूकान् च कृत्वा प्रदूषणप्रभावात् कथं सुरक्षा करणीया इत्यस्मिन् विषये चेतनानिवार्या स्यात् येन विभिन्नप्रकारकेभ्यः प्रदूषणेभ्यः मानवानां रक्षा स्यात् । एवमेव मृद्जलेत्यादिप्रदूषणेभ्योऽपि रक्षोपाया अन्वेष्टव्याः । इह वैशिष्ट्येन वक्तव्यमस्ति यत् महिलाः कियज्जागरूकाः सन्ति प्रदूषणं प्रति अत एव ब्रुवन्तश्चलेम यन्महिलानां भूमिका पर्यावरणसंरक्षणे पुराकालादेवाग्रणी आसीत् । यतोहि भारतीयमहिलाः कस्मिन्नपि क्षेत्रे पुरुषेभ्योऽल्पाः नासन् । स्वतन्त्रतासङ्ग्रामे सहभागिता कलाक्षेत्रे साहित्ये समाजसेवायामथवा साहसिककार्याणां क्षेत्रेषु महिलाः सर्वदा पुरुषेभ्योऽग्रण्य आसन् । पुनरस्मिन् क्षेत्रे कुतः महिलाः दयनीयाः स्युः । पर्यावरणस्य संरक्षणे संवर्धने महिलानां भूमिका विभिन्नैर्विद्वद्भिः पृथक्–पृथगुपपादिता–

**कार्लमार्क्समहोदयानुसारेण -** "किमपि सामाजिकपरिवर्तनं महिलाभ्य त्रहते भवितुं नार्हति"।[4]

**कॉफी उन्नान् महोदयेन उक्तम्-** "अस्यां पृथिव्यां सम्पूर्णमपि भविष्यं महिलानां हस्ते एव भवति ।[5]

राजस्थानराज्यस्य खेजडली आन्दोलनं पर्यावरणचेतनाया अतुलनीयमुदाहरणं प्रस्तौति । राजस्थानस्य खेजडली इत्याख्यस्य ग्रामस्य स्थानीयजनैः आन्दोलमेतत् कृतमासीत् । 1970 तमे वर्षे जोधपुरनृपः स्वराज्ये काष्ठस्य द्वारं निर्मातुमिष्टवान् तस्य कृते काष्ठमानेतुं केचन कर्मकराः तेन प्रेषिताः ते कुठारं स्वीकृत्य खेजडली ग्रामं प्राप्ताः यत्र खेजडीवृक्षा अत्यधिकमात्रायां रोपिता आसन् ते तान् वृक्षान् कर्तितुमारभन्त । ग्रामीणमहिलया "अमृता देव्या" तस्य

---

2 - मत्स्यपुराणम् पृष्ठसंख्या 154

3 - श्रीमद्भगवद्गीता 3.4

4 - प्रज्ञा,पर्यावरण विशेषांक, काशी हिन्दू विश्वविद्यालय, वाराणसी अंक -55 ,2009-10

5- प्रकाश ओम, प्राचीन भारत का सामाजिक एवं आर्थिक इतिहास, विश्व प्रकाशन, नई दिल्ली 2001

विरोध: कृत: । वृक्षाणां रक्षार्थं च स्वकीयाभि: तिसृभि: पुत्रीभि: सह वृक्षे संलिप्य प्राणान् अपि तत्याज । उपर्युक्तां घटनां दृष्ट्वा "रिचर्ड बरवे" [6] सम्पूर्णे विश्वे पर्यावरणसंरक्षणस्य उदाहरणरूपेण प्रचारितवान प्रसारयच्च ।

'सरदारसरोवरपरियोजनायां वनान् प्रति महिलानाम् आत्मचेतनां दृष्ट्वा राष्ट्रियवननीतौ 1988 तमे वर्षे महिलानां सहभागिता महत्त्वपूर्णं स्थानं प्राप्तवती । कन्यां रक्षतु पर्यावरणं रक्षतु इति भावनया सह 2006 तमे वर्षे ग्रामे कन्याया: जन्मन: "पिपलान्त्री" इति "राजस्थानस्यराजसमंदजनपदे एकादशशततम: वृक्षरोपणनियमोऽपि कृत: ।[7]

**"प्राणान् त्यजेम परं वृक्षान् न त्यजेम "**

अस्यां भावनायामाधिरतमेतत् आन्दोलनं तत्कालीने उत्तरप्रदेशे "चमोली" जनपदे सन् 1973 तमे वर्षे समारभत् । सम्प्रति चमोली जनपद: उत्तराखण्डे स्थितो वर्तते । आन्दोलनस्यास्य जनक: "सुन्दरलाल बहुगुणा" इत्याख्यो व्यक्तिरासीत् किन्त्वस्य मुख्या भूमिका महिलाभिरेव ऊढा । प्राय: दशकं यावत् आन्दोलनमेतत् प्राचलत् । आन्दोलनेनैतेन जनसामान्यपर्यन्तं पर्यावरणसंरक्षणस्य जागरूकताया: महत्वं प्रापितम् । अस्यापरं नाम "इको फिनिस्ट" आन्दोलनमित्यपि विद्यते यतोहि अस्य कार्यकर्तार आधिक्येन महिला एवासन् । अस्यान्दोलनस्य नेतृत्वं "गौरी देव्या" कृतम् । तत्र 26.मार्च 1974 तमे दिने "रेणी" वृक्षान् कर्तयितुमायातान् जनान् चमोलीग्रामस्य महिला इदमुक्त्वा प्रेषितवत्य: – **"वनमस्माकं मातृगृहमस्ति वयमस्यछेदं न सोढुं शक्नुम:"[8] ।** एतैर्वचनै: स्पष्टमेव यत् यथा महिलानां जीवने स्वस्य पितृपक्षस्य स्थानं वर्तते तथैव तासां जीवने वृक्षाणामपि वर्तते । एतेन तासां पर्यावरणं प्रति जागरूकता स्नेहं च दृश्यते । उद्यानानां जलाशयानाञ्च शोधनं कर्तुं स्वच्छताया: विषये च जनान् अवगतान् कर्तुं स्थाने स्थाने स्पष्टं भाषणं कृत्वा वृक्षारोपणं प्रति वृक्षान् प्रति वा समुदायेषु पर्यावरणसंरक्षणस्य कृते जनचेतनायै प्रेरयति । यतोहि तस्य "कार्यकर्तार अधिकतया महिला आसन् । एतत् आन्दोलनं गौरी देव्या: नेतृत्वे प्राचलत् । एतत् तासां पर्यावरणं प्रति जागरूकताया: स्नेहस्य च परिणाम अस्ति ।

पर्यावरणसंरक्षणे शिक्षकाणां भूमिका अग्रत: भवति । शिक्षिकाभि: बुद्ध्या छात्रान् समाजस्य विविधसमस्यानां विषये बोधयित्वा तान् नवीनं सफलं च समाधानं अन्वेष्टुं प्रेरयितुं शक्यते । अस्य कृते एतादृशा: विविधा: कार्यक्रमा आयोज्यन्ते । ते निम्नलिखितरूपेण सन्ति –

- अध्यापिकाभि: कक्षा–शिक्षणे कया पद्धत्या छात्रा: पाठयितुं शक्यन्ते इति सामर्थ्यं विकसनीयम् ।
- बालकान् पर्यावरणसंरक्षणार्थं प्रेरयितुं तांश्च छात्रान् भाषणकलादक्षान् कर्तुं क्षमताया: विकसनीयम् ।
- पर्यावरणसम्बन्धीनि चलचित्राणि निबन्धा: लेखाश्च सुसज्जिता: कृत्वा पूर्वनिर्मितासु सामग्रीषु अपेक्षाकृतं परिवर्तनं कृत्वा सूक्ष्मरूपेण अवबोधने छात्राणां सहाय्यं कर्तुं शक्नुवन्ति ।
- धूम्ररहितपाकशालाया उपयोगं कर्तुं शिक्षयति ।
- ध्वनिकारकयंत्राणां दृश्य–श्रव्यसाधनानाम् उपयोगं स्वप्रकोष्ठत एव सीमितं कर्तुं प्रेरयति ।
- वृक्षारोपणं प्रति वृक्षान् प्रति वा समुदायेषु पर्यावरणसंरक्षणस्य कृते जनचेतनायै प्रेरयति ।

---

[6] - पर्यावरणसंरक्षण में महिलाओं का योगदान,श्रीवास्तव,नीरज 2008

[7] -- अग्निहोत्री, प्रभुदयाल , संस्कृत साहित्य एवं पर्यावरण, ईस्टर्न बुक लिंकर्स दिल्ली 2011पृ. सं. 413

[8] - प्रज्ञा,पर्यावरण विशेषांक, काशी हिन्दू विश्वविद्यालय, वाराणसी अंक -55 ,2009-10

प्रत्यक्ष–पर्यटनविधेश्च– अनया पद्धत्या छात्राणां समीपे स्थितानां परिसराणां दूरस्थक्षेत्राणां च भ्रमणं कृत्वा पर्यावरणसंरक्षणस्य ज्ञानं प्रदीयते । भ्रमणकाले छात्राणां कृते पर्वतशिलाजलाशयानां प्राकृतिकवनस्पतिधातूनां जीवजन्तूनां दुर्लभजातीनां च इत्यादीनां प्राकृतिकस्रोतसां विषये प्रत्यक्षसूचनाः प्रदीयन्ते । एतेषां च माध्यमेन छात्राणां कृते पर्यावरणसन्तुलनस्य महत्त्वं कथयित्वा अवलोकनस्य अवसरः भवति ।

यदि महिलाः स्वपर्यावरणस्य विषये अवगताः भवन्ति तर्हि ताः परिवारे समाजे विद्यालयेषु च उपस्थितान् छात्रान् जागरूकान् कर्तुं समर्थाः भविष्यन्ति । एतदर्थं तासां प्रशिक्षणमेव मुख्याधारं मन्यते । एतेन शिक्षकाः कक्षायाः विद्यालयस्य च वातावरणस्य अनुभवं दातुं समर्थाः भवन्ति । छात्रेषु विविधप्रकारस्य पर्यावरण–ज्ञान–कौशल–दृष्टिकोण–मूल्यानाञ्च विकासः कर्तुं शक्यते । छात्रेषु पर्यावरणं प्रति रुचिरुत्पाद्यन्ते । शैक्षिकपाठ्यक्रमे शिक्षकाः पर्यावरणशिक्षां समावेश्य पर्यावरणस्य विविधपरिवर्तनानां माध्यमेन छात्राणां कल्याणं कर्तुं शक्नुवन्ति । तस्मात् कारणात् तेषां हानिः भवितुं न शक्यते । पर्यावरणसंरक्षणस्य सुधारस्य च अभियानं बृहत्परिमाणेन सञ्चालितुं सम्पूर्णसमाजस्य दायित्वम् अस्ति । अतः जनसामान्यं पर्यावरणविषये अवगतः भवेत् । अध्यापिकानां कर्तव्यम् एतादृशम् अस्ति यत् कदा कुत्र कस्मिन् नगरे स्वछात्रेभ्यः पर्यावरणसंरक्षणार्थं आयोजनं कुर्युः । तस्य लाभाः के सन्ति ? इति विषये छात्राः सामान्यजनाश्च सूचनीयाः । छात्राणां सामान्यजनाञ्च कृते पर्यावरणस्य विषये ज्ञानं भवेत् इति शिक्षिकायाः कृते आवश्यकं महत्त्वपूर्णं च भवति ।

**ग्रन्थसूची –**


1. शिक्षा एवं संस्कृतिः नये सन्दर्भ, डॉ. भास्कर मिश्र, भावना प्रकाशन, 1995
2. धर्म का समाजशास्त्र, डॉ. कमलस्वरूप श्रीवास्तव, प्रकाशन कुटीर, 2018
3. ग्रामीण एवं नगरीय समाजशास्त्र, डॉ. अशोक डी. पाटिल, हिन्दी ग्रन्थ अकादमी भोपाल
4. संस्कृत साहित्य एवं पर्यावरण, अग्निहोत्री प्रभुदयाल , ईस्टर्न बुक लिंकर्स दिल्ली 2011पृ. सं. 413
5. सामाजिक शिक्षा की अवधारणा, महेश भार्गव, निशी गोयल, राखी प्रकाशन, 2011